International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 234-237
© 2021 IJSR
www.anantaajournal.com
Received: 17-05-2021
Accepted: 22-06-2021

**शिवकुमार भट्टः**
कर्नाटकसंस्कृतमहाविद्यालयः
चामराजपेट, बेङ्गलूरु,
कर्णाटकराज्यम्, भारतम्

Corresponding Author:
**शिवकुमार भट्टः**
कर्नाटकसंस्कृतमहाविद्यालयः
चामराजपेट, बेङ्गलूरु,
कर्णाटकराज्यम्, भारतम्

# तध्दितस्वरूपः

धातुर्ब्रह्मैव सम्प्रोक्तम् जीव आख्यातमुच्यते।
प्रकृतिः कृत्सुबन्तादि धातुब्रह्मात्मने नमः ॥

## शिवकुमार भट्टः

वर्णसमूहः पदम्। पदसमूहो वाक्यम्। भाषा सर्वदा वाक्यात्मिका भवति। "स्याद्योग्यताकाङ्क्षासतियुक्तः पदोच्चयः वाक्यम्" [१]। अर्थानुगुणतया परस्परं सम्बध्दानां पदानां समूहः वाक्यम्।

वर्णपदवाक्यानां विभज्यान्वाख्यानं व्याकरणस्य विषयः। शिक्षाशास्त्रे तावत् वर्णानां स्वरूपान्वाख्यानमक्रियत। अधुना पदानां व्याक्रियायामेषा कौशलं किञ्चित् प्रदर्शयिष्यते। सर्वाणि पदानि नामपदानि क्रियापदानि चेति द्विधा। निपातास्तु नामपदेष्वेवन्तर्भवति। अत एव आचार्यपाणिनिः शास्ति पदसंज्ञाम् – "सुप्तिङन्तं पदम्" (पा.सु-२/४/१४) इति। सर्वेषां पदानां पुनर्द्वेधा भवति अन्तर्विभागः – प्रकृतिः, प्रत्ययश्चेति। तत्र नामप्रकृतेः प्रातिपदिकस्य "सुप् विभक्ति प्रत्ययः, क्रियाप्रकृतेः धातोः "तिङ्" इत्याख्यातप्रत्ययः। प्रादिपदिकञ्च निरूढं यौगिकश्चेति द्वेधा। तत्र यौगिकं धातोरेव निष्पाद्यते पाणिनीये। निरूढमपि प्रकृतिप्रत्ययविभागेनोणादिषु निष्पादितं शाकटायनेन। यदाह – "नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् [२]॥ इति।

"अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (पा.सु. १/२/५७)" "कृत्तधितसमासाश्च" (पा.सु. २/२/४६) इति सूत्राभ्याम् व्याख्यायते। अतः धातुनिष्पन्नेपि धातुभिन्नः प्रत्ययभिन्नः, अर्थयुक्तः वर्णसमूहः कृत्तधितसमासनिषपन्नः प्रातिपदिक संज्ञको भवति। अनन्तरं "ङ्याप्प्रातिपदिकात्" (पा. सु ४/२/२) इति सूत्रेण प्रातिपदिकरूपप्रकृतेः सुप् स्त्रिप्रत्यय तद्दितप्रत्ययाः "धातोः" (पा.सु.३/१/११) इति सूत्रेण धातुरूपप्रकृतेः तिङ् – कृत्प्रत्ययाश्च विधीयन्ते। अत्र प्रकृतिः मूलं भवति। तर्हि को नाम प्रत्ययः? प्रतीयते विधीयत इति प्रत्ययः इति "अणुदित्सवर्णस्य चा प्रत्ययः (पा. सु.९/१/१) इति सूत्रे कथयति।

प्रत्ययभिन्नः, अर्थयुक्तः वर्णसमूहः कृत्तधितसमासनिषपन्नः प्रातिपदिक संज्ञको भवति। अनन्तरं “ङ्याप्प्रातिपदिकात्” (पा. सु ४/२/२) इति सूत्रेण प्रातिपदिकरूपप्रकृतेः सुप् स्त्रिप्रत्यय तद्दितप्रत्ययाः “धातोः” (पा.सु.३/१/११) इति सूत्रेण धातुरूपप्रकृतेः तिङ् – कृत्प्रत्ययाश्च विधीयन्ते। अत्र प्रकृतिः मूलं भवति। तर्हि को नाम प्रत्ययः? प्रतीयते विधीयत इति प्रत्ययः इति “अणुदित्सवर्णस्य चा प्रत्ययः (पा. सु.९/१/१) इति सूत्रे कथयति।

प्रत्ययः (पा.सु.३/१/१) इति तृतियाध्यायस्यादिमं सूत्रमिदम्। इतः ऊर्ध्वमापञ्चमाध्यायस्य परिसमाप्तेः प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते। “परश्च” (पा.सु.३/१/२) अयमपि योगः आपञ्चमपरिसमाप्तेः अधिकारः। प्रकृतेः परः प्रत्ययः प्रवर्तत इत्यर्थः।

दशरथस्य पुत्रः इत्यत्र जन्यजनकभावः सम्बन्धार्थः षष्ट्यर्थः।” वृक्षस्य शाखा” इत्यत्र अवयवावयविभागःइत्येवं प्रकारेण एकशतं षष्ट्यर्थाः इति भाष्यकारः। धातोरर्थद्वयम् – फलं व्यापारश्च। तत्र फलं कर्मनिष्टं, व्यापारः कर्तृनिष्टः। “रामो ग्रामं गछति” इति वक्ये तिङ्प्रत्ययार्थः कर्ता। प्रथमान्तस्य अभेदेन तिङर्थे कर्तृरन्वयः। धातोः संयोगानुकूल व्यापारोऽर्थः। संयोगः फलम्। तस्य कर्मः अपि ग्रामेऽन्वयः। दशरथस्य पुत्रः इत्यस्मिन्नेवर्थे तध्दिते इञ् प्रत्यये द्शरथस्य अपत्यं पुमान् “दाशरथिः” इति एकमेव पदं लभ्यते। भगवता पाणिनिना अष्टाध्यायां तृतीये, चतुर्थे,पञ्चमे चाध्याये प्रत्ययकुलमेव संगृहीतम्। तृतीयाध्याये १:- सन्-क्यच्-कम्यच्-क्यङ्-क्यषोऽथारक्विब्णिज्यङौ तथा। यगायईयङ्णिङ्श्चेति द्वादशामि सनादयः ॥ २ :- स्य-तास्-सिप्-आम्-चिण्-यक्_- शप्_-श्यन्-शलु-शः-शनम्-श्ना-आङ् इति चतुर्दश प्रत्ययाः स्यादयः, शताधिकाः कृत्प्रत्ययाः तिबादयोऽष्टादशप्रत्ययाश्चोक्ताः। चतुर्थाध्याये सुबादयः एकविंशतिः विभक्तिप्रत्ययाः नव स्त्रिप्रत्ययाश्चाभिहिताः। अवशिष्टे चतुर्थाध्याये पञ्चमाध्याये च वर्तन्ते कथिताः तध्दितप्रत्ययाः। तध्दितेषु अन्तर्भूताः समासान्तप्रत्या अपि भवन्ति। एवमेव विभिन्नेष्वर्थेषु वार्तिकाचार्येणापि कात्यायनेन निरूपिताःबहवस्तध्दितप्रत्ययाः दृश्यन्ते।सुप्,प्रत्ययेभ्यः अन्ये प्रातिपदिकानां पुरतः ये प्रत्ययाः आगच्छन्ति ते एव तध्दिताः।तध्दित प्रत्ययान्त शब्दाः तध्दितान्ताः।

तध्दित विभागाः

१ तरप् , तमप्।

२ अपत्यार्थकः।३ भावार्थकः।

४ सम्बन्धार्थकः।५ अव्ययम्।

**१ तरप्, तमप् –** गुणवाचकानां बाहुल्यं सूचयितुं तरप्, तमप् प्रत्ययौ आगच्छतः। अर्थद्वयस्य तुलनायां तरप् इति प्रत्ययः,बहूनां तु तमप् प्रत्ययः भवति।

उदाहरणानि –

अजगजयोः गजः स्थूलतरः। अजगजवृषभाणां गजः स्थूलतमः।

तरप्, तमप् प्रत्यय रूपाणी। पुल्लिङ्गम् स्त्रीलिङ्गम् नपसकलिङ्गम्

| | | |
|---|---|---|
| तरः | तरा | तरम् |
| तमः | तमा | तमम् |

२ अपत्यार्थकः। तस्यापत्यम्[१] (४।१।९२)।

‘तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत्।
उत्सर्गः शेष एवासौ वृध्दान्यस्य प्रयोजनम्[२]॥

नामपदानाम् आदिस्वरस्य वृध्दिर्भवति एतत् सुत्रानुसारेण।तथा अ,इ,ए,कारान्ताः शब्दाः च भवन्ति।तस्य पुत्रः,तस्याः पुत्रः,तस्य कुलम्,गोत्रं,वंशः इत्यर्थेऽपि अपत्यार्थक तध्दिताः भवन्ति।

उदाहरणानि – अण् प्रत्ययान्ताः - रघोः अपत्यं पुमान्–राघवः।

रघु + ङस् + अण् (प्राग्दीव्यतोऽण् –पा,सू .४।१।८३)[१](तस्यापत्यम्- पा,सू .४।१।९२)[२]

रघु + अण् (कृत्तध्दितसमासाश्च - पा,सू .१।२।४६)इति प्रातिपदिकत्वे (सुपो धातुप्रातिपदिकयोः )[3]

रघु + अ (हलन्त्यम् -पा,सू .२।३।३) (तस्य लोपः- पा,सू .२।३।९)

राघु + अ (तध्दितेष्वचामादेः[४]- पा,सू .६।२।११७) इत्यनेन आदिवृधौ

राघो+ अ (ओर्गुणः[५]-पा,सू.६।४।१४६) इति गुणे कृते (एचोऽयवायावः- पा,सू.६।१।७८) अवादेशे

राघव+सु (स्वौजसमौट्६- पा,सू .४।१।२)इति सुप्प्रत्यये उकारलोपे रुत्वे विसर्गे च

राघवः -इति रूपं सिध्दं भवति

उपगोः अपत्यं पुमान्।– औपगवः भृगोः अपत्यं पुमान्।- भार्गवः

पृथायाः अपत्यं पुमान्।- पार्थः । धृतराष्ट्रस्य अपत्यं पुमान्।- धार्तराष्ट्रः

''इञ् ' प्रत्ययान्तः

दशरथस्य अपत्यं पुमान्।- दाशरथिः।

दशरथ+ङस्+ इञ् (अत इञ्[१]–प,सू-४।१।६५) (तस्यापत्यम्- पा,सू .४।१।९२)

दशरथ + इञ् (कृत्तध्दितसमासाश्च - पा,सू .१।२।४६) इति प्रातिपदिकत्वे (सुपोधातुप्रातिपदिकयोः[४] पा,सू .२।४।७१) ङसि लुक्

दाशरथ + इ (तध्दितेष्वचामादेः- पा,सू .६।२।११७) इत्यनेन आदिवृधौ (यस्येति च[२] दाशरथ्+इ - पा,सू - ६।४।१४८) इत्यकारलोपः। (स्वौजसमौट्६- पा, सू .४।१।२) इति दाशरथिः - सुप्प्रत्यये उकारलोपे रुत्वे विसर्गे च।

दक्षस्य अपत्यम् – दाक्षिः=इञ् प्रत्ययः।

विनतायाः अपत्यं पुमान् - वैनतेयः- ढक् प्रत्ययः (स्त्रीभ्यो ढक्[३] ४।१।११६)

मनोः अपत्यम्- मनुष्यः. षुक् – प्रत्ययः

लक्षया रक्तम्–लाक्षिकः–ठक् (लाक्षारोचनाठक् ४।२।२)

श्रवणायुक्ता पौर्णमासि – श्रावणी (लुप्)

श्रवणा पौर्णमास्यस्मिन्निति – श्रावणः श्रावणिकः – ष्ठक्

मसो देवता अस्य – मसिकः .ठञ्

भिक्षाणां समूहः- भैक्षम् (अण्)

३ भावार्थकः।

ब्राह्मणानां समूहः – ब्राह्मण्यम् (यञ्) (ब्राह्मणमाणववाडवाद्यन् ४।२।४२)

ग्रामाणां समूहः – ग्रामता - तल् (ग्रामजनबन्धुभ्यस्तल् ४।२।४३)

जनानां समूहः –जनता - तल् प्रत्ययः

बन्धूनां समूहः - बन्धुता - तल् प्रत्ययः

४ सम्बन्धार्थकः

छः ,इयादेशः

युवयोः युष्माकं वा अयं – युष्मदीयः।

आवयोरस्माकं वा अयं – अस्मदीयः।

खञ् ,ईनादेशः

मामकीनः-मामकः

शरदि ऋतौ भवम् – शारदिकः .श्राध्दम्- टञ्

अमायां भवम् -अमावस्या .अण्

तिष्ये भवम् -तैषम् –अण्

प्रगच्छतीति प्रगः,तस्मिन् जातम् –प्रगेतनम्

सिंधौ जातम् – सैन्धवः

गम्भीरे भवम् – गाम्भीर्यम् (ञ्यः)

पञ्चाना पूरणः - पञ्चमः (नान्तादसंख्यादेर्मट्[१]।५।२।४६)

अ' प्रत्ययाः

इन्द्रस्य इदम् - ऐन्द्रम्

समुद्रस्य इदम् – सामुद्रम्

ज्योतिषः इदम् – ज्यौतिषम्

भूमेरिदम् - भौमम्

ईय' प्रत्ययः।

तस्य इदम्- तदीयम्

मम इदम् – मदीयम्। भारतस्य इदम् – भारतीयम्।

५ अव्ययम्।

लिङ्ग वचन विभक्ति रहित शब्दः अव्ययम्।केषां चित् सर्वनामप्रातिपदिकानां –था , त्र, दा,दानीम्,तस्प्रत्ययाः भवन्ति,ते शब्दाः तध्दिताव्ययानि भवन्ति।

भा, त्र, दा प्रत्ययस्य उदाहरणानि

तद् + था –तथा।यद् + था –यथा

सर्व + था – सर्वथा ।तद् + त्र - तत्र

यद् + त्र – यत्र । सर्व +त्र – सर्वत्र

तद् + दा – तदा

यद् + दा – यदा

सर्व + दा – सर्वदा

किम् + दा – कदा

दानीम्, तस्, प्रत्ययौ

उदाहरणानि

इदम् + दानीम् = इदानीम्

तद् + दानीम् = तदानीम्

पञ्चमी विभक्त्यन्ते तस् प्रत्ययः आगच्छति

ग्राम् + तः = ग्रामतः

मत् + तः = मत्तः

तद् + तः = ततः

त्वद् + तः = त्वत्तः

**सन्दर्भः**

1. साहित्यदर्पणः
2. महाभाष्यम् ३/.३/१
3. तस्यापत्यम्[१] (४।१।९२)- षष्यन्तात्कृतसंधेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्ययाः वा स्युः।
4. वार्तिकम् (२५८१-२५८४)
5. प्राग्दीव्यतोऽण् –पा,सू .४।१।८३ –तेन दीव्यति- इत्यतः प्रागणधिक्रियते।
6. तस्यापत्यम्- पा,सू .४।१।९२ – षष्ट्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्यत्।
7. सुपो धातुप्रातिपदिकयोः पा,सू .२।४।७१ – एतयोरवयवस्य सुपो लुक्स्यात्।
8. तध्दितेष्वचामादेः- पा,सू .६।२।११७-ञिति णिति च तध्दिते परेऽअचामादेरचो वृध्दिः स्यात्।
9. ओर्गुणः- पा,सू .६।४।१४६-उवर्णान्तस्य भस्य गुणः स्यात्तध्दिते।
10. स्वौजसमौट्६- पा,सू .४।१।२- ङ्यान्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः।
11. अत इञ् –प,सू-४।१।६५ – अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात्षष्ठ्यन्तादिञ्स्यादपत्येऽर्थे।
12. यस्येति च - पा,सू -६।४।१४८)-भस्येवर्णावर्णयोः लोपः स्यादिकारे तध्दिते च परे।
13. स्त्रीभ्यो ढक्- ४।१।११६-स्त्रीप्रत्ययान्तेभ्यो ढक्स्यात्।
14. सुपोधातुप्रातिपदिकयोः[४] पा,सू .२।४।७१- ङ्यान्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः।